# श्रीसोमनाथसंस्कृतयुनिवर्सिटी,वेरावलम्
# सत्रान्तपरीक्षा – एप्रिल – २०१९

**कक्षा –** शास्त्रिद्वितीयवर्षम् (SEM-4) **प्रश्नपत्रम् –** ०६ **गुणा: -** ७०

**विषय: -** साहित्यम् **कोड – C.**C. **2.4.8. (NEW)** **समय: -** ०३ त: ०६

**दिनाङ्क: -** ०४/०४/२०१९ **सन्दर्भग्रन्थः –** स्वप्नवासवदत्तम्

---

## प्रथमान्वितिः (Unit-1)

**प्रश्नः – १ अधोलिखितेषु कयोश्चित् द्वयो: ससन्दर्भं व्याख्यां कुरुत ।** १०

१.मधुमदकला मधुकरा मदनार्ताभि: प्रियाभिरुपगूढा: ।
पादन्यासविषण्णा वयमिव कान्ता वियुक्ता: स्यु: ॥

२. पद्मावती बहुमता मम यद्यपि रूपशीलमाधुर्यै: ।
वासवदत्ताबद्धं न तु तावन्मे मनो हरति ॥

३. दु:खं त्यक्तुं बद्धमूलोऽनुराग: स्मृत्वा स्मृत्वा याति दु:खं नवत्वम् ।
यात्रा त्वेषा यद् विमुच्येह बाष्पं प्राप्ताऽऽनृण्या याति वृद्धि: प्रसादम् ॥

**प्रश्नः – २** भासनाटकचक्रमित्यस्य विषये लिखन्तु । १०

**(अथवा)**

चतुर्थाङ्कस्य सारांशं लिखत ।

## द्वितीयान्वितिः (Unit-2)

**प्रश्नः – ३ निम्नलिखितेषु द्वयो: ससन्दर्भं व्याख्यां कुरुत ।** १०

(१) रूपश्रिया समुदितां गुणतश्च युक्तां
लब्ध्वा प्रियां मम तु मन्द इवाद्य शोक: ।
पूर्वाभिघातसरुजोऽप्यनु भूतदु:ख:
पद्मावतीमपि तथैव समर्पयामि ॥

(२) शय्यामवसुप्तं मां बोधयित्वा सखे गता ।
दग्धेति ब्रुवता पूर्वं वञ्चितोऽस्मि रुमण्वता ॥

(३) भिन्नास्ते रिपवो भवद्गुणरता: पौरा: समाश्वासिता:
पार्ष्णीयापि भवत्प्रयाणसमये तस्या विधानं कृतम् ।
यद्यते सध्यमरिप्रमाथजनने तत्तन्मयानुष्टतं
तीर्णा चापि बलैर्नदी त्रिपथगा वत्साश्च हस्ते तवा ।

प्रश्नः – ४ राज – विदूषकयो: संवादवर्णनं लिखत । १०

(अथवा)

पञ्चमाङ्कस्य सारांशं लिखत ।

## तृतीयान्विति:(Unit - 3)

**प्रश्नः –५ अधोलिखितेषु कयोश्चित् द्वयो: ससन्दर्भंव्याख्यां कुरुत ।** १०

१. श्रुति-सुख-निनादे! कथं नु दिव्या: स्तनयुगले जघनस्थले च सुप्ता ।
विहग-गण-रजो-विकीर्ण- दण्डा प्रतिभयमध्युषिताऽस्यरण्यवासम् ॥

२. किं वक्ष्यतीति हृदयं परिशङ्कितं मे कन्या मयाप्यपहृता न च रक्षिता सा ।
भाग्यैश्चलैर्महदवाप्तगुणोपघात: पुत्र: पितुर्जनितरोष इवास्मि भीत: ॥

३. क: कं शक्तो रक्षितुं मृत्युकाले रज्जुच्छेदे के घटं धारयन्ति ।
एवं लोकस्तुल्यधर्मो वनानां काले काले छिद्यते रुह्यते च ॥

प्रश्नः –६ षष्ठाङ्कस्य सारांशं लिखत । १०

(अथवा)

पद्मावत्या: चरित्रचित्रणं कुरुत ।

## अन्वितय: १ – ३ (Unit 1 – 3)

**प्रश्नः –७ अधोलिखितेषु प्रश्नेषु दशानां प्रश्नानां लघूत्तरं लिखत ।** १०

१) स्वप्नवासवदत्तस्य रचयिता क: ?

२) स्वप्नवासदत्तस्य कति अङ्का: ?

३) अस्मिन् नाटके नायक: क: ?

४) उदयनस्य द्वितीया भार्या का ?

५) वासवदत्ताया: मातु: नाम किम् ?

६) मगधराज – दर्शकस्य भगिन्या: नाम किम् ?

७) प्रद्योतस्य पुत्र्या: नाम किम् ?

८) अहो! विचित्रता कुसुमानाम् । इदं वाक्यं कस्मिन् अङ्के विद्यते ?

९) वत्सदेशस्य राजा क: ?

१०) पञ्चमाङ्के कति श्लोका: ?

११. उदयनस्य मुख्यमन्त्री क: ?

१२.अवन्तिका का अस्ति ?

१३. 'प्रायेण हि नरेन्द्रश्री: सोत्साहैरेव भुज्यत' -
सूक्तिरियं कस्मिन् अङ्के विद्यते ?

१४. उदयन: कीदृश: नायक: ?

१५. सर्वगतं कुशलमिति ? इदं वाक्यं क: वदति ?

*****************